रोगाः पञ्चषष्टिः सप्तस्वायतनेषु तत्रायतनान्योष्ठौ दन्तमूलानि दन्ता जिह्वा तालुकण्ठः "सर्वाणि चेति। तत्राष्टावोष्ठयोः। पञ्चदश दन्तमूलेषु, अष्टौ दन्तेषु, इति चोपक्रम्योक्तं यथा।

"दन्तमूलगतास्तु शीतादो१ दन्तपुप्पुटको२ दन्तवेष्टकः३ शौषिरो४महाशौषिरः५परिदर६ उपकुशो७ दन्तवैदर्भो८ वर्द्धनो९ऽधिमांसो१०नाड्यः१५पञ्चेति" इत्युद्दिश्य "शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्त्तते। दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च। दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम्। शीतादो नाम स व्याधिः कफशोणितसम्भवः१। दन्तयोस्त्रिषु वा यस्य श्वयथुः सरुजो महान्। दन्तपुप्पुटको ज्ञेयः कफरक्तनिमित्तजः२। स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च। दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः३। श्वयथुर्दन्तमूलेषु रुजावान् कफरक्ततः। लालास्रावी स विज्ञेयः कण्डूमान् शौषिरो गदः४। दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते। दन्तमांसानि पच्यन्ते मुखञ्च परिपीड्यते। यस्मिन् स सर्वजो व्याधिर्महाशौषिरसंज्ञकः५। दन्तमांसानि शीर्य्यन्ते यस्मिन् ष्ठीवति चाप्यसृक्। पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः६। वेष्टेषु दाहः पाकश्च तेभ्यो दन्ताश्चलन्ति च। आघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनाः। आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते। यस्मिन्नुपकुशः स स्यात्पित्तरक्तकृतो गदः७। घृष्टेषु दन्तमूलेषु संरम्भो जायते महान्। भवन्ति च चला दन्ताः स वैदर्भोऽभिघातजः८। मारुतेनाधिको दन्तो जायते तीव्रवेदनः। वर्द्धनः स मतो व्याधिर्जाते रुक् च प्रशाम्यति९। हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः। लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः१०। दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः१५। "दन्तगतास्तु दालनः१ क्रिमिदन्तको२ दन्तहर्षो३ भञ्जनकः४ दन्तशर्करा५ कपालिका६ श्यावदन्तो७ हनुमोक्षश्चेति। दाल्यन्ते बहुधा दन्ता यस्मिंस्तीव्ररुगन्विताः। दालनः स इति ज्ञेयः सदागतिनिमित्तजः। कृष्णच्छिद्री चलः स्रावी ससंरम्भो महारुजः१। अनिमित्तरुजो वाताद्विज्ञेयः क्रिमिदन्तकः२। दशनाः शीतमुष्णञ्च सहन्ते स्पर्शनं न च। यत्र तं दन्तहर्षन्तु व्याधिं विद्यात्समीरणात्३। वक्त्रं वक्रं भवेद्यस्मिन् दन्तभङ्गश्च तीव्ररुक्। कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः४। शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै। सा दन्तानां गुणघ्नी तु विज्ञेया दन्तशर्करा५। दलन्ति दन्तवल्कानि यदा शर्करया सह। ज्ञेया कपालिका सैव दशनानां विनाशिनी५। योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः। श्यावतां नीलतां वापि गतः स श्यावदन्तकः७। वातेन तैस्तैर्भावैस्तु हनुसन्धिर्विसंहतः। हनुमोक्ष इति ज्ञेयो व्याधिरर्दितलक्षणः८"।

**दन्तलेखक** त्रि॰ दन्तान् लिखति जीविकार्थम् लिख— "संज्ञायाम्" पा॰ ण्वुल् "नित्यं क्रीडाजीविकयोः" पा॰ नित्यस॰। दन्तलेखनरूपजीविकायुक्ते। "अके जीविकार्थे" पा॰ पूर्वपदस्याद्युदात्तत्वम्।

**दन्तवक्र** पु॰ करूषाधिपे द्वापरयुगोद्भवे हिरण्यकशिपोरवताररूपे नृपभेदे "हिरण्यकशिपुर्योऽसौ दैत्यराजोऽभवत् पुरा। पृथुकीर्त्त्यां तु संजज्ञे तनयो वृद्धशर्मणः। करूषाधिपतिर्वीरो दन्तवक्रो महाबलः" हरिवं॰ ३५ अ॰। "अधिराजाधिपञ्चैव दन्तवक्रं महाबलम्। जिगाय करदञ्चैव कृत्वा राज्ये न्यवेशयत्" भा॰स॰३०अ॰। सहदेवदक्षिणदिग्विजयोक्तौ "द्वारवत्यां निवसता यदुसिंहेन तेन वै" इत्युपक्रमे "दन्तवक्रस्य कारूषो निहतो दक्षिणापथे" हरिवं॰१७२अ॰। द्वारकावासकाले कृष्णेन बधो वर्णितः। "मातृष्वस्रेयोवश्चैद्यो दन्तवक्रश्च पाण्डव!। पार्षदप्रवरौ विष्णोर्विप्रशापात् पदच्युतौ" भाग॰ ७।१।३२ इत्युपक्रमे हिरण्याक्षादिजन्मनाशोक्त्यनन्तरम् "तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव। अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ"। ४४ "कृष्णोऽपि तमहन् गुर्व्या कौमोदक्या स्तनान्तरे। गाढनिर्भिन्नहृदय उद्वमन् रुधिरं मुखात्। प्रसार्य्य केशान् बाह्वङ्घ्रीन् धरण्यां न्यपतद्व्यसुः। ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतम्" भाग॰१०।७७।७

**दन्तवल्क** पु॰ दन्तस्य वल्कमिव। दन्तावरकचर्मात्मके मांसभेदे "दलन्ति दन्तवल्कानि यदा शर्करया सह" सुश्रुतः।

**दन्तवर्त्ति** स्त्री दन्तनिर्मिता वर्त्तिः। "दन्तैर्हस्तिवराहोष्ट्रगवाश्वाजखरोद्भवैः सशङ्खमौक्तिकाम्भोधिफेनैर्मरिचपादिकैः क्षतशुक्रमपि व्याधिं दन्तवर्तिर्निवर्त्तयेत्" चक्रदत्तोक्ते वर्तिकाभेदे। [ ओष्ठे हेम॰।

**दन्तवस्त्र** न॰ दन्तस्य वस्त्रमिव छादकत्वात्। दन्तवाससि

**दन्तवासस्** न॰ दन्तस्य वास इवाच्छादकत्वात्। ओष्ठे त्रिका॰